पाठ-22

# प्रियं भारतम्

राजतां मे मनसि नः प्रियं भारतम्।
द्योतितं तत्स्वरूपं लसतु शाश्वतम्।
मेखला विन्ध्यगोदावरी-जाह्नवी
मस्तकं हिमगिरिः सागरो नूपुरम्॥
राजतां मे.............

शिविदधीचिप्रभृतिभिस्तथा सेवितम्
चन्द्रशेखर-भगतसिंह-विस्मिल प्रियम्।
गान्धिना यत् प्रदत्तं स्वकं जीवनम्
प्राणसर्वस्वदानैः कृतार्थीकृतम्॥
राजतां मे.............

स्वप्नदर्शि-प्रजातन्त्र-सम्पोषकम्
विश्वनेतृप्रियं नेहरूपण्डितम्।
शास्त्रि राजेन्द्र-अब्दुलहमीदादिकम्
पुत्रजातं च लब्ध्वातिदर्पान्वितम्॥
राजतां मे.............

सैन्यदाक्ष्यञ्च विज्ञानप्रौद्योगिकीम्
विस्तृतां कर्त्तुमग्रेसरं यत् सदा।
राष्ट्रचिन्तापरं श्रमपरं चानिशं
हर्षितं वीक्ष्य सर्वत्र मोदान्वितम्।
राजतां मे.............

## अभ्यासः

1. भारतं कां विधां विस्तृतां कर्तुम् अग्रेसरं वर्तते।
2. महात्मा गाँधी किं कृत्वा स्वजीवनं कृतार्थी कृतवान्?
3. भारतस्य मेखलाः के सन्ति?

★★★